M-93

उदयतियदिभानुःपश्चिमायांदिशायांविकसतियदि
पद्मंपर्वताग्रेशिलायांप्रचलतियदिमेरुःशीततांयातिवह्निः
।नचलतिनराणांभाषितंकर्मरेखा।

१ ॐ श्रीगणेशाय नमः नूतनजलधररुचये गोपवधूटीदुकूलचौराय तस्मै कृष्णाय
नमः संसारमहीरुहस्य बीजाय १ द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकं समवाय
स्तथाभावः पदार्थाः सप्त कीर्तिताः २ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः द्रव्या
ण्यथ गुणा रूपं रसो गंधस्ततः परं ३ स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परं संयोगश्च
विभागश्च परत्वं चापरत्वकं ४ बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकं द्रवत्वं स्नेह
संस्कारावदृष्टं शब्द एव च ५ उत्क्षेपणं ततोपक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्मा
ण्येतानि पंच च ६ भ्रमणं रेचनं स्पंदनोर्द्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादे ति
व लभ्यते ७ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ८
परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ९ व्यापकत्वात्प
रापि स्याद्व्याप्यत्वादपरापि च अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः १० घटादीनां

१

कपालादिषु द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंध समवायः प्रकीर्तितः ११ अभावस्तु द्विधा सं
सर्गान्योन्याभावभेदतः प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च १२ एवं त्रैविध्यमापन्न
संसर्गाभाव इष्यते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १३ द्रव्यादयः पंच भावा अने
के समवायिनः सत्तावंतस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः १४ सामान्यपरिहीनास्तु स
र्वे जात्यादयो मताः पारिमांडल्यभिन्नानां कारणत्वमुदाहृतम १५ अन्यथासिद्धिशू
न्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम १६ समवायिकार
णत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुत्वं १७
यत्समवेतं कार्यं भवति ज्ञेयं समवायिकारणं तत् तत्रासन्नं जनकं द्वितीयमाभाष

२ रं तृतीयं स्मृतं १७ येन सह पूर्वभावः कारणमादाय वा यस्य अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभाववि
ज्ञानं १८ जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते अतिरिक्तमथापि यद्भवेन्नियतावश्यक
पूर्वभाविनः १९ एते पञ्चान्यथासिद्धा दंडत्वादिकमुच्यते घटादौ दंडरूपादि द्वितीयमपि दर्शितं प
२० तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ
२१ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयं गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वं
२४ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता
२५ क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी २६ का
लखात्मदिशां सर्वगतत्वं परमं महत् क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि २७ द्र
व्यारंभश्चतुर्षु स्यादथाकाशशरीरिणां अव्याप्यवृत्तिः क्षणिको विशेषगुण उच्यते २८ रूपरस ॥

प्रत्यक्ष्योगिनः पृथगात्मनः गुरुणी द्वे रसवती द्रवो नैमित्तिको द्रवः २९ आत्मानो भूतवर्गा
स्यविशेषगुणा योगिनः यद्दृष्टं यस्य सा धर्मो वै धर्ममितरस्य तत ३० वायोर्नवैकादश तेजसो गु
णा जले तु दिशः शाणाभूतं तावत्तुर्दश दिक्कालयोः पंच खे षड् एव चांबु मे ह स्मरे शेमनसस्तैव च ३१
स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ३२ स्प
र्शादयोऽष्टौ वेगाख्यद्रवत्वं च गुरुत्वकम् रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ३३ स्नेहहीना
गंधयुता क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा ३४ धर्माधर्मौ गु
णा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ३५ संख्यादयः पं
च बुद्धिरिच्छा प्रयत्नोऽपि च स्मरे परापरत्वे संख्यादिपंच वेगश्च मानसे ३६ तत्र क्षितिर्गंधहेतुर्नानारू
पवती मता षड्विधस्तु रसस्तत्र गंधस्तु द्विविधो मता स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीत पा

योनिजादिर्भवेद्देहमिंद्रियं घ्राणलक्षणं विषयो द्व्यणुकादिस्तु ब्रह्मांडांतमुदाहृतः २

सा

३पी० कजः नित्यानित्या च द्वेधा नित्या स्यादणुलक्षणा ३७ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी
सा च त्रिधा भवेद्देहइंद्रियं विषयस्तथा ३८ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ स्नेहस्तद्द्र
वत्वं तु सांसिद्धिकमुदाहृतं ३९ नित्यतादि प्रथमवत् किंतु देहमयोनिजं इंद्रियं रसनं सिंधुहि
मादिर्विषयो मतः ४० स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लं भास्वरं नैमित्तिकं द्रवत्वं तु नित्यतादि
च पूर्ववत् ४१ इंद्रियं नयनं वह्निस्वर्णादिर्विषयो मतः अपाकजोनुष्णाशीतस्पर्शस्तु पवने मतः ।।
तिर्यग्गमनवानेष ज्ञेयस्पर्शादिलिंगकः पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिंद्रियं प्राणादिस्तु महा
वायुःपर्यंतो विषयो मतः ४२ आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः इंद्रियं तु भवेच्छ्रोत्रमे
कः सन्नुपाधितः जन्यानां जनकः कालो जगतामाश्रयो मतः परापरत्वधीहेतुः क्षणादिः स्या
दुपाधितः ४५ दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते उपाधिभेदादेकापि प्राच्यादिव्यपदे
शभाक् ४६ आत्मेंद्रियाद्यधिष्ठाता करणं हि सकर्तृकं शरीरस्य न चैतन्यं मृतेषु व्यभिचार

तथात्वंचेदिंद्रियाणामुपघातेकथंस्मृतिः मनोपिनतथाज्ञानाद्यनध्यक्षंतदाभवेत् ४८ धर्माधर्मा
श्रयोध्यक्षोविशेषगुणयोगतः प्रवृत्याद्यनुमेयोयंरथगत्येवसारथी ४९ अहंकारस्याश्रयोयं
मनोमात्रस्यगोचरः विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तुद्विविधामता ५० अनुभूतिःस्मृतिश्चस्या
दनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ५१ घ्राणजादिप्रभेदेनप्रत्य
क्षंषड्विधंमतं घ्राणस्यगोचरोगंधोगंधत्वादिरपिस्मृतः ५२ तथारसोरसज्ञायास्तथा
शब्दोपिचश्रुतेः उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वंतिपृथक्त्वसंख्ये विभागसं
योगपरापरत्वस्नेहद्रवत्वंपरिमाणयुक्तम् क्रियाजातियोग्यवृत्तिःसमवायश्चतादृशः
गृह्णातिचक्षुःसंबंधादालोकोद्भूतरूपयोः ५५ उद्भूतस्पर्शवद्द्रव्यंगोचरःसोपिचत्वचः
रूपान्यच्चक्षुषोयोग्यंरूपमत्रापिकारणम् ५६ द्रव्याध्यक्षेत्वचोयोगोमनसाज्ञानका

भा॰ का॰ रणंमतं मनोग्राह्यंसुखंदुःखमिच्छाद्वेषोमतिःकृतिः ५७ ज्ञानंयन्निर्विकल्पाख्यंतदती
न्द्रियमिष्यते महत्त्वंषड्विधेहेतुरिन्द्रियंकरणंमतम ५८ विषयेन्द्रियसंबंधोव्यापारः
सोपिषड्विधः द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवायतः ५९ द्रव्येषुसमवेतानांतथात
त्समवायतः तत्रापिसमवेतानांशब्दस्यसमवायतः ६० तद्वृत्तीनांसमवेतसमवायेनतु
ग्रहः विशेषणतयातद्वदभावानांग्रहोभवेत ६१ यदिस्यादुपलभ्येतेत्येवंयत्रप्रस
ज्यते प्रत्यक्षंसमवायस्यविशेषणतयाभवेत ६२ अलौकिकस्तुव्यापारस्त्रिविधःप
रिकीर्तितः सामान्यलक्षणोज्ञानलक्षणोयोगजस्तथा ६३ आसत्तिराश्रयाणांतु
सामान्यज्ञानमिष्यते तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते ६४ विषयीयस्यतस्यैवव्या
पारोज्ञानलक्षणः योगजोद्विविधःप्रोक्तोयुक्तयुंजानभेदतः ६५ युक्तस्यसर्वदाभानं

विंतासहकृतोपरः शुक्तिप्रत्यक्षे ६ः व्यापारस्तुपरामर्शः करणंव्याप्तिधीर्भवेत् ६६
अनुमायांज्ञायमानंलिंगंतुकरणंनहि अनागतादिलिंगेननस्यादनुमितिस्तदा ६७
व्याप्यस्यपक्षवृत्तित्वधीःपरामर्शउच्यते व्याप्तिःसाध्यवदन्यस्मिन्नसंबंधउदाहृतः ६८
अथवाहेतुमन्निष्ठविरहप्रतियोगिना साध्येनहेतोरेकाधिकरण्यंव्याप्तिरुच्यते ६९
सिषाधयिषयाशून्यासिद्धिर्यत्रनतिष्ठति सपक्षस्तत्रवृत्तित्वज्ञानादनुमितिर्भवे
त् ७० अनैकांतोविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासस्तु
पंचधा ७१ आद्यःसाधारणस्तुस्यादसाधारणकोपरः तथैवानुपसंहारीत्रिधानै
कांतिकोभवेत् ७२ यःसपक्षेविपक्षेचभवेत्साधारणस्तुसः यस्तूभयस्माद्व्यावृत्तःस
त्वसाधारणोमतः ७३ तथैवानुपसंहारीकेवलान्वयिपक्षकः यःसाध्यवतिनैवास्तिसवि

यथा पर्वतो व
ह्निमान् कस्मात्
प्रमेयत्वात् २

यथा शब्दो नि
त्यः कस्मात्
[redacted]
शब्दत्वात् २

यथा सर्वमनित्यं कस्मात्
प्रमेयत्वात् २

यथा शब्दो नित्यः
कस्मात् कृतकत्वात्

मर

प्र० का०

रुद्ध उदाहृतः ७४ आश्रयासिद्धिराद्यास्यात्स्वरूपासिद्धिरप्यथा व्याप्यत्वासिद्धिरपरा स्यादसिद्धि
रतस्त्रिधा ७५ पक्षासिद्धिर्यत्र पक्षे भवेन्मणिमयो गिरिः ह्रदो द्रव्यं धूमवत्वादत्राश्रयासिद्धिरथापरा
७६ व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ७७
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः उत्पत्तिकालीने घटे गन्धादिर्यत्र साध्यते ७८
ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् सादृश्यधीर्गवादीनां या स्यात्सा करणं मतं वा
क्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गवयपदवाच्यतात्प्रमितिधीरुपमाफलं पदज्ञानं
तु करणं द्वारं तत्र पदार्थधीः ८० शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी शक्तिग्रहं व्या
करणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सि
द्धपदस्य वृद्धाः लक्षणा शक्यसंबंधस्तात्पर्यानुपपत्तितः ८१ आसत्तिर्योग्यता
कांक्षा तात्पर्यज्ञानमिष्यते कारणं सन्निधानं तु पदस्यासत्तिरुच्यते ८२ पदेर्थेत

यथा शब्दो नित्यः कस्मात् श्रावणत्वात् शब्दत्ववत् शब्दोऽनित्यः कार्यत्वात् घटवत्

उक्ता योग्यता परिकीर्त्तिता यत्पदेन विना यस्याननुभावकता भवेत् ८३ आकांक्षा वक्तुरिच्छा तु ता
त्पर्यं परिकीर्त्तितं साक्षात्कारे सुखादीनां करणं मन उच्यते ८४ अयौगपद्याज्ज्ञानानां तस्याणु
त्वमिहेष्यते अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ८५ रूपं रसस्पर्शगंधौ परत्वम
परत्वकं द्रवत्वस्नेहवेगाश्च मता मूर्त्तगुणा अमी ८६ धर्माधर्मौ भावना च शब्दो बुद्ध्यादयो
पि च एतेऽमूर्त्तगुणाः सर्वे विद्वद्भिः परिकीर्त्तिताः ८९ संख्यादिश्च विभागांता उभयेषां गुणा म
ताः संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ९० द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गु
णाः अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ९१ बुद्ध्यादिषट्कं स्पर्शांताः स्नेहः सांसिद्धिको द्रवः
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ९२ संख्यादिरपरत्वांतो द्रवो नैमित्तिकस्तथा गुरु
त्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः ९३ संख्यादिरपरत्वांतो द्रवत्वं स्नेह एव च एते तु द्वीन्द्रि

६ का०

यग्राह्यास्त्वक्स्पर्शांतशब्दकाः॥९४ वाह्यैकैकेंद्रियग्राह्या गुरुत्वादृष्टभावना अतींद्रियं विभूनां
तु ये स्युर्वैशेषिका गुणाः॥९५ अकारणगुणोत्पन्ना एते तु परिकीर्तिताः अपाकजास्तु स्पर्शांता द्र
वत्वं च तथाविधं॥९६ स्नेहगुरुत्वैकपृथक्त्वपरिमाणक स्थितिस्थापक इत्येते स्युः कारणगुणो
द्भवाः॥९७ संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः स्पर्शांतपरिमाणैकपृथक्त्वस्नेहशब्दके
॥९८ भवेदसमवायित्वमथ वैशेषिको गुणो आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः॥९९
वेगेपि च द्रवत्वे च संयोगादिद्वये तथा द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत्॥१००
वैशेषिको विभुगुणः संयोगादिद्वयं तथा चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलंभकं॥१ चक्षु
षः सहकारि स्यात् शुक्लादिकमनेकधा जलादिपरमाणौ तु नित्यमन्यत्सहेतुकं॥२ रस
सो रसनाग्राह्यो मधुरादिरनेकधा सहकारी रसज्ञाया नित्यत्वादि च पूर्ववत्।

६

राम

घ्राणग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः ३ सौरभश्चासौरभश्च स द्वेधा परि
कीर्तितः स्पर्शस्त्वगिंद्रियग्राह्यस्त्वचः स्यादुपकारकः ४ अनुष्णाशीतशीतोष्ण
भेदात्स त्रिविधो मतः काठिन्यादि क्षितावेव नित्यत्वादि च पूर्ववत् ५ एतेषां पाकजत्वं तु
क्षितौ नान्यत्र कुत्रचित् तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ६ नैयायिकानां तु न
ये द्व्यणुकादावपीष्यते गणनव्यवहारे तु संख्याभिधीयते ७ नित्येषु नित्यमेक
ति त्वमनित्येऽनित्यमिष्यते द्वित्वादयः परार्द्धांता अपेक्षाबुद्धिजा मताः ८ अनेकाश्रय
पर्याप्ता एते तु परिकीर्तिताः अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः ९ अनेकैकत्व
बुद्धिर्या सापेक्षाबुद्धिरुच्यते परिमाणं भवेन्मानव्यवहारस्य कारणम् १० अणुदीर्घ
महद्ध्रस्वमिति तद्भेद ईरितः अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ११ संख्या

को०

तः परिमाणाच्च प्रचयादपि जायते अनित्ये द्व्यणुकादौ तु संख्याजन्यमुदाहृतं १२
परिमाणं घटादौ तु परिमाणजमीरितं प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्य
ते १३ परिमाणं तूलकादौ नाशः स्वाश्रयनाशतः संख्यावच्च पृथक्त्वं स्यात्पृथ
क्प्रत्ययकारणं १४ अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते अस्मात्पृथगि
दं नेति प्रतीतिर्हि विलक्षणा १५ अप्राप्तयोस्तु या प्राप्तिः सैव संयोग उच्यते की
र्तितस्त्रिविधस्त्वेष आद्योन्यतरकर्मजः १६ उभयकर्मजन्यो भवेत्संयोग
जोपरः आदिमः श्येनशैलादिसंयोगः परिकीर्तितः १७ मेषयोः सन्निपातो यः स
द्वितीयः उदाहृतः कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः १८ तृतीयः
स्यात्कर्मजोपि द्विविधः परिकीर्तितः अभिघातो नोदनञ्च शब्दहेतुरिहादि

शाद्धेतुर्द्वितीयः स्याद्विभागोऽपि द्विधा भवेत् एककर्मभवस्त्वाद्यो द्वयकर्मोद्भवः परः १९
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः २० परत्वं चापरत्वं च
द्विविधं परिकीर्तितं देशिकं कालिकं चापि मूर्त एव हि देशिकं २१ परत्वं मूर्तसंयोगाभूयस्त्वज्ञा
नतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं २२ तयोरसमवायी तु दिक्संयोगस्तदाश्रये दि
वाकरपरिस्पंदभूयस्त्वज्ञानतो भवेत् २३ परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः अत्र त्व समवायी स्यात्
संयोगः कालपिंडयोः २४ अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृतः बुद्धेः प्रपंचः प्रागेव प्रायशो वि
निरूपितः २५ अथावशिष्टोऽप्यपरः प्रकारः परिदृश्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते २६ ४३
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तत्प्रपंचो विपर्यासः संशयादिः प्रकीर्तितः २७ आद्यो दे
हेष्वात्मबुद्धिः शंखादौ पीततामतिः भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते २८ किंस्विन्नरो वा
रे

स्थाणुर्वैत्वादिबुद्धिस्तु संशयः तदभावाप्रकाराधीस्ततत्प्रकारा तु निर्णयः २९ संशयस्तु मतिर्या स्यादे
कत्राभावभावयोः साधारणादिधर्मस्य ज्ञानं संशयकारणं ३० दोषोप्रमायाजनकः प्रमाया
स्तु गुणो भवेत पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ३१ प्रत्यक्षे तु विशेष्येणाव ता सहस विशेषण३
न्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ३२ पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत शक्ये
सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ३३ शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा गुणः स्या
द्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ३४ अथवा तत्प्रकारं यत ज्ञानं तद्विशेष्यकं तत्प्रमा न प्रमा
नापि भ्रमः स्यान्निर्विकल्पकं ३५ प्रकारतादिशून्यं हि संबंधानवगाहि यत प्रमात्वं न स्वतौ ग्रा तो
ह्यं संशयानुपपत्तितः ३६ व्यभिचारस्याग्रहेपि सहचारग्रहस्तथा हेतुर्व्याप्तिग्रहे तर्कः क्वचि
च्छंकानिवर्तकः ३७ साध्यस्य व्यापको यस्तु हेतुरव्यापकस्तथा स उपाधिर्भवेत्तस्य नि
ष्कर्षोयं प्रदर्श्यते ३८

दयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥३९॥ व्यभिचारस्यानुमानं उपाधेस्तु प्रयोज-
नं । शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥४०॥ अनुमाने गतार्थत्वादिति वैशेषिकं मतं । तन्न
न्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः ॥४१॥ त्रिविधं लक्षणमेव व्याप्तिरन्वयः व्यतिरे-
कतः । अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते ॥४२॥ साध्याभावव्यापकत्वं हेत्वभावस्य य-
द्भवेत् । अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ॥४३॥ व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा
यतः । सुखं तु जगतामेव काम्यं धर्मेण जन्यते ॥४४॥ अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचे-
तसां । निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ॥४५॥ इच्छा तु तदुपाये स्यादि-
ष्टोपायत्वधीर्यदि । चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् ॥४६॥ तद्धेतुः कृतिसाध्ये-

६ का०

ष्टसाधनत्वमतिर्भवेत् (त०) बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रवृत्तिबाधिका ४७ तद्धेतुत्वबुद्धे
स्तद्धेतुत्वं कस्यचिन्मते द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् ४८ प्रवृत्तिश्च
निवृत्तिश्च तथा जीवनकारणम् एवं प्रयत्नत्रिविधं तान्त्रिकैः परिदर्शितम् ४९ चि
कीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्य चाध्यक्षं प्रवृत्तौ जनको
भवेत् ५० निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः यत्नो जीवनयोनिस्तु
सर्वदातीन्द्रियो भवेत् ५१ शरीरे प्राणसंचारकारणं तत्प्रकीर्तितम् अतीन्द्रियं
गुरुत्वं स्यात्पृथिव्यादिद्वयवृत्ति तत् ५२ अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृ
तम् तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ५३ संसिद्धिके द्रवत्वं स्यान्नैमित्ति

कर्मपापरत्वसांसिद्धिकंतत्सलिलेद्वितीयंक्षितितेजसोः५४परमाणौजलेनित्यमन्यत्रा
नित्यमुच्यतेनैमित्तिकंवह्नियोगात्तपनीयघृतादिषु५५द्रवत्वंस्यन्दनेहेतुर्निमित्तंस
ग्रहेतुतत्स्नेहोजलेसनित्योणावनित्योवयविस्मृतः५६तैलान्तरेतत्प्रकर्षाद्दहन
स्यानुकूलतासंस्कारभेदोवेगथस्थितिस्थापकभावने५७मूर्तमात्रेतुवेगःस्यात्कर्म
जोवेगजःक्वचित्स्थितिस्थापकसंस्कारःक्षितौकेचिच्चतुर्ष्वपि५८अतीन्द्रियंयतद्विज्ञेयं
क्वचित्स्पन्देपिकारणंभावनाख्यस्तुसंस्कारोजीववृत्तिरतीन्द्रियः५९उपेक्षानात्मकस्त
स्यनिश्चयःकारणंभवेत्स्मरणेप्रत्यभिज्ञायामप्यसौहेतुरुच्यते६०धर्माधर्मावदृष्टं
स्याद्धर्मःस्वर्गादिसाधनंगंगास्नानादियागादिव्यापारःसतुकीर्तितः६१कर्मनाशाज
लस्पर्शादिनानाश्यस्त्वयंमतःअधर्मोनरकादीनांहेतुर्निन्दितकर्मजः६२प्रायश्चित्तादि
नाश्योसौजीववृत्तीत्विमौगुणौइमौतुवासनाजन्यौज्ञानादपिविनश्यतः६३शब्दोध्व

का १०

निश्चवर्णो श्चमृदंगादिभवो ध्वनिः कंटसंयोगादिजन्यावर्णास्तेकाद्यामताः ६४ स
र्वशब्दोनभोवृत्तिः श्रोत्रोत्पन्नस्तुगृह्यते वीचीतरंगन्यायेनतदुत्पत्तिस्तुकीर्तिता
६५ कदंबगोलन्यायेनतदुत्पत्तिःकस्यचिन्मते उत्पन्नकोविनष्टकइतिबुद्धेरनित्य
ता ६६ सोयंकइतिबुद्धिस्तुसाजात्यमवलंबते तदेवौषधमित्यादौसजातीयेपिदर्श
नात् ६७ इतिमद्भट्टाचार्य्यसिद्धांतपंचाननविरचिताभाषापरिच्छेदःसमाप्तः॥
इति चंद्रेणलिपिकृतं संमत ॥१९२९॥ मिति मागदि २ समाप्तः
इनीचन्द्रेणाकार्कावस्थालिपिकृतं सपठनार्थं कस्मिन्स्थानेलिपिकृतं श्रीधारा
कथं मूलनाद इतिचंद्रः नंदलालरै समत १९२९ मि॰मा॰सु॰९वा॰गु॰ ❁
स्यसरवः